अप्रैल तः मई २०२२ पर्यन्तम्
चैत्र-कृष्ण-अमावस्या तः ज्येष्ठ-शुक्ल प्रतिपदा पर्यन्तम्
(वै-२०७८-७९)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-९ संयुक्ताङ्कः-९-१०



सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# " संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# " संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अप्रैल तः मई
२०२२ पर्यन्तम्

वर्षम्-९-संयुक्ताङ्कः-९-१०

(वै0–२०७८–७९)

( चैत्र-कृष्ण-अमावस्या तः
ज्येष्ठ-शुक्ल प्रतिपदा
पर्यन्तम् )

सम्पादकः
डॉ. अरुणकुमार झा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक-सहायकः
मनोज कुमारः

आवरण/सज्जा
श्रीमती पूजा गड़ाकोटी

| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | लघुके लघुके मे नेत्रे | श्री ऋषिराजः जानी | १ |
| ३. | सूर्य-पितामह! | ,, | २ |
| ४. | देवं ददाति कर्म नयति | डॉ. सौ. शारदा गाडगे | ३ |
| ५. | अभिमानं कदापि न करणीयम् | प्रो. कुलदीप कुमारः | ६ |
| ६. | सहसा विदधीत न क्रियाम् | डॉ. रामकिशोर मिश्रः | ८ |
| ७. | समरसः एव जीवनम् | डॉ. जी. म. कट्टि | ११ |
| ८. | पुरस्कारयोग्यः कः | डॉ. केशव देवः | १५ |
| ९. | सविनय अवज्ञा आन्दोलनम् | श्री दिनेशः शर्मा | २० |
| १०. | आचार्यदेवो भव | श्री मनोजः डिमरी | २२ |
| ११. | व्यावहारिक-संस्कृत-शिक्षणम् | ,, | २४ |

**दिल्ली संस्कृत अकादमी**

( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

**ई-पत्रिका**

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 20920363


## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि


ISSN : 2347-1565



©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi


शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)


E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : https://sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरवाणीसमुपासकाः सहृदयाः!**

अस्माकं संस्कृतसाहित्ये विविधग्रन्थानां विविधविषयाः दृश्यन्ते लोककल्याणाय। तेषु च प्रधानग्रन्थाः दृश्यन्ते वेदाः, गीताः, पुराणानि, नीतयः। वेदेषु ज्ञानकाण्डं कर्मकाण्डं च निहितं विद्यते। यज्ञानुष्ठानादिकमपि यथायोग्यं यथास्थानं विवृतं विद्यते। गीतायां च कथं जीवनं जीवनीयम् इति विषयं विवृत्य जीवनशैली संस्कारः संस्कृतश्चि विविधतया प्रदर्शितो विद्यते। पुराणेषु अस्माकं धर्माणां संस्काराणां वा दृष्टान्ताः कथारूपेण प्रयुक्ताः सन्ति। यत्र च धर्माचरणम् पापाचरणम् पुण्यपथप्रवर्तनम् इत्यादीनां सत्यज्योतिः पथप्रवर्तकाः पन्थानः निर्दिष्टाः सन्ति। तथा च नीतिषु ज्ञानं विज्ञानं कर्तव्यम् अकर्तव्यम्, ज्ञेयम् हेयम् इत्यादीनाम् प्रायशः वर्णनं विद्यते। अतः इत्येते ग्रन्थाः एव अस्माकं संस्कृतसंस्कृतिजीवनोज्जीवनाय प्रधानभूताः सन्ति। एतेषां रक्षणेन अस्माकं देशः अस्माकं समाजः महोन्नतिपदं प्राप्स्यति। सम्प्रति व्युत्पन्नानानां बालानामपि  उत्साहार्थम् नवीनः प्रयासः सेत्स्यति। यथा– **बालाः नीतिकलालाल्याः नवीनसुदिशा सदा।** इत्युक्तिमनुसृत्य सततं लोकसेवायै संस्कृतसेवायै संस्कृतिरक्षायै निरन्तरं प्रयतामहे वर्धामहे परिचरामहे इति शम्।

भावत्कः

**शकाब्दः १९४४** **डॉ. अरुणकुमार झा**

सचिवः

# लघुके लघुके मे नेत्रे

-ऋषिराजः जानी



लघुके लघुके मे नेत्रे स्तः ।
सदा सुन्दरं शिवं पश्यतः ।
लघुकौ लघुकौ मे कर्णौ स्तः
भद्रं शृणुतः मधुरं शृणुतः ॥
लघुकौ लघुकौ मे पादौ स्तः।
सदैव चलतः, सदैव भ्रमतः॥
लघुकौ लघुकौ मे हस्तौ स्तः
देवं नमतः, गुरुं च नमतः॥
लघुका लघुका मे जिह्वास्ति ।
मधुरभोजनं सदा खादति ॥
लघुकं नासापुटं ममास्ति ।
मधुरसुगन्धं सदा जिघ्रति ॥
लघुकं लघुकं मुखं ममास्ति..
रामनाम तद् मधुरं रटति ॥



# सूर्य-पितामह!

सूर्य-पितामह! कस्माद् नित्यं
उग्रो भूत्वा विश्वं दहसि?
स्वयमपि दग्धो भवसि न त्वं किम्?
रोषमीदृशं कस्माद् वहसि?

शोषमुपैति जलं नदीनां
शुष्का वृक्षाः पश्य! वनानाम्।
प्रार्थयन्ति पुष्पाणि तरूणां
तथापि न त्वं सदयं पश्यसि।

नित्यं त्वां प्रणमामि प्रभाते...
किन्तु पिहिते भवतो नेत्रे...
क्षणं केवलं पश्यामि त्वां
तदा लोचने अश्रूपूरिते।
सृष्टेः वारि त्वं किं पिबसि?

॥ इति ॥



- ८ राजतिलक बंगलोजः
आबादनगरम्, बोपल,
अहमदाबादः

# दैवं ददाति कर्म नयति

-डॉ. सौ. शारदा गाडगे

मार्च मासस्य अन्तिमः दिवस उदितः। अद्य श्रीधरः कार्यालयात् सेवानिवृत्तः भवति। नित्यक्रमानुसारं श्रीधरः कार्यालयम् आगतः। सर्वाणि कार्याणि अपि तेन कृतानि। किन्तु अद्य तस्य मनः स्थिरं नासीत्। तत्र सुखदुःखयोः मिश्रणमासीत्। पञ्चत्रिंशत् वर्षेभ्यः यत्र कार्यं कृतं तद् कार्यालयं विहाय अद्य गन्तव्यं, श्वः तत्र न आगन्तव्यम् इत्येष विचारः तं नितराम् अपीडयत्। अन्यत्र तु, श्वः न भविष्यति किमपि बन्धनम्। अहं मुक्तः भविष्यामि इति विचारः तम् आमोदयत्। रात्रौ तेन सर्वे सहकारिणः, मित्राणि, आप्तेष्टाश्च भोजनार्थं गृहे निमन्त्रिताः। निवृत्ति समारोहार्थं तस्यपुत्रौ अजयविजयौ सपरिवारम् आगतौ आस्ताम्। समारोहः सोत्साहं सम्पन्नः। कश्चित् प्रौढः अपरिचितः मनुष्यः श्रीधरस्य समीपम् आगत्य तस्मै पुष्पस्तबकं दत्तवान्, स्वपरिचयं च दत्तवान् -

"महोदय अहं चन्द्रकान्तः। भवतः गृहस्य पार्श्वे एव निवसामि। भवद्भ्यः शुभेच्छां दातुम् आगतोस्मि।" इति उक्त्वा भोजनम् अकृत्वा एव सः निष्क्रान्तः।

अन्येद्युः श्रीधरः गृहे एव आसीत्। सपरिवारे सः अतीव आनन्दम् अभूतवान्। वार्तालापं कुर्वन् महाराष्ट्र अधिकोषे मुम्बापुरियां कार्यरतः तस्य ज्येष्ठः पुत्रः अजयः तम् अपृच्छत्, "तात गतदिने भवतां भविष्यत् निर्वाहनिधेः धनादेशः प्राप्तः नु ?"

श्रीधरः अवदत्, "आम्।"

अजयः पुनश्च अवदत्, "तस्य निधेः भवान् किं कर्तुम् इच्छति? यदि मम अधिकोषे निवेशयितुम् इच्छति भवान् तर्हि अहं नवनवीनाः योजनाः कथयिष्यामि।"

श्रीधरः मनसि अचिन्तयत्, यदि अस्य अधिकोषे निवेशयामि तर्हि सर्वत्र एष स्वकीयम् एव नामाङ्कनं कारयिष्यति। मम मरणादनन्तरं सर्वं धनम् एष एकलः कवलयिष्यति।

श्रीधरे विचारमग्ने स्थिते चेन्नैनगरे कस्मिन्नपि यन्त्रालये कार्यरतः विजयः अवदत्, "तात अहं चेन्नैनगरे सदनिकां क्रेतुमिच्छामि। चेन्नैनगरे सदनिकाः अतीव महार्घाः। अहं ऋणं स्वीकारयिष्यामि किन्तु ऋणात् पूर्वं यद् धनं दातव्यं तद् धनं नाम दशलक्ष रूप्यकाणि भवान् मह्यं ददातु। अहं प्रतिमासं पञ्चविंशति सहस्र रूप्यकाणि भवत् कोषे प्रेषयिष्यामि ।"



श्रीधर: दृढस्वरेण अवदत्, ''वत्स, एष धनराशि नाम मम वार्धक्यस्य आधार:, मम वृद्धापकालस्य आत्मविश्वास:। तुभ्यं धनं दत्वा आपत्काले अहं कस्य मुखं द्रक्ष्यामि? त्वं सदनिकाम् अवश्यं क्रीण: किन्तु स्वबलेन, न मम धनेन।" श्रीधरस्य भार्या अवदत्, "शान्तेन मनसा चिन्तयितु भवान्। विजय: ऋणरूपेण एव धनं याचते। स: अवश्यं प्रत्यर्पयिष्यति।" श्रीधराय भार्याया: एष विचार: नारोचत्। स: हस्तसङ्केतेन एष तस्य दृढ नकारम् असूचयत्। तदा एव विजयस्य भार्या सर्वेभ्य: चायचषकान् अयच्छत्। अत: इयं चर्चाचायचषके एव विरता।

अन्येद्यु: अजयविजयौ स्व स्व स्थानं प्रस्थितौ। द्वा-त्रीणि दिनानि श्रीधरेण विश्रामे एव यापितानि। एकदा कश्चित् प्रौढ: मनुष्य: तस्य गृहम् आगतवान् उक्तवान् च। "अहं चन्द्रकान्त:।" श्रीधर: झटिति तं स्मृतवान्। चन्द्रकान्त: अग्रे अवदत्, "अहं हिरण्मयी अर्थसंस्था इत्यत्र कार्यं करोमि। सुविख्याता अस्ति अस्माकं संस्था। अस्माकं समीपे निक्षिप्त: धनराशि: वर्षत्रयात् द्विगुणित: भवति। अस्माकं कार्यालय: इत: किञ्चित् दूरे वर्तते। यदि भवान् निवृत्ति धनस्य लाभम् इच्छति तर्हि तत्र आगच्छतु।"

तस्य भाषणं श्रुत्वा श्रीधर: विचारमग्न: अभवत्। तदनन्तरं तस्मिन् सप्ताहे प्रतिदिनं चन्द्रकान्त: तस्य गृहम् आगतवान्। तस्मै कमपि उपहारं दत्तवान्। पुन: पुन: स्वसंस्थाया: गुणगानं च श्रावितवान्। एकदा श्रीधर: तेन सह तस्य कार्यालयं गतवान्। तत्रत्या: रक्षक:, सेवक: मधुरभाषिणी स्वागतिका, लिपिक:, व्यवस्थापक: सर्वे श्रीधराय सहर्षं स्वागतं व्याहृत्य तेन सह अत्यादरेण आत्मीयतया च समभाषन्त। तत्सर्वं दृष्ट्वा श्रीधर: भृशं प्रभावित:। भूरि विचिन्त्य दशलक्ष रूप्यकाणि स: तत्र निवेशितवान्। वर्षत्रयातनन्तरं विंशति लक्ष्यरूप्यकाणि अहं लप्स्ये इति विचार: तं नितराम् असुखयत्।



सार्ध द्विवर्षाणि अतीतानि। श्रीधरेण एष व्यवहार: न कस्मै अपि निवेदित:। षण्मासेभ्य: अनन्तरं सर्वान् निवेदयिष्यामि, मम व्यवहारचातुर्यं च प्रदर्शयिष्यामि इति स: अचिन्तयत्। प्रतिमासं संस्थाया: कार्यालयस्य परिसरं सप्रयोजनं गत्वा दूरादेव कार्यालयं निरीक्ष्य निश्चिन्त: अभवत्। एवमेव एकदा श्रीधर: हिरण्मयी अर्थसंस्थाया: मार्गेण गतवान्। किन्तु नासीत् तत्र संस्थाया: नामफलक:। न वा कोऽपि रक्षक:। प्रवेशद्वारे विशालं तालं दृष्ट्वा स: आश्चर्यचकित: अभवत्। स: चन्द्रकान्तेन सह दूरभाषमाध्यमेन वक्तुं प्रायतत। किन्तु तस्य भ्रमणध्वनिक्रमाङ्क: एव अस्तित्वे नासीत् अन्वेष्टुं श्रीधर: तस्य गृहे गतवान्। गृहेऽपि ताल: एवं तस्मै स्वागतं व्याहरत्। आरात्रं श्रीधर: निद्रां न अलभत्। अन्येषु सर्वेषु वार्तापत्रेषु प्राधान्येन वार्ता

आसीत्हिरण्मयी अर्थसंस्थया कोटिशः रूप्यकाणि कवलितानि। नैके जनाः वञ्चिताः। आरक्षकाः संस्थायाः व्यवस्थापकम् अन्विष्यति। दूरदर्शने अपि एषा एव वार्ता आसीत्। श्रीधरस्य नेत्रयोः पुरतः अन्धकारः विकीर्णः। तस्य सर्वाणि गात्राणि कम्पितानि, तस्य विचारशक्तिः जडतां गता। वञ्चितोऽहं, वञ्चितोऽहम् इति एकः एव विचारः तम् अग्रासयत्। सः अस्वस्थः अभवत्। तस्य क्षुधा, तृष्णा, निद्रा सर्वम् अपगतम्। दिनद्वयात् एव तस्य सर्वे केशाः रजत वर्णियाः सञ्जाताः, मुंख शुष्कतां गतम्। शरीरं कृशम् अभवत्। भार्यया पुनः पुनः पृष्ठे सति सः तां सर्वम् अकथयत्। भृशं पश्चात्तापं च अकरोत्। आजीवनं धनसङ्ग्रहार्थं कृताः परिश्रमाः अवलम्बितं कार्पण्यम्, इच्छानां दमनम् एतद् सर्वं स्मृत्वा तस्य दुःखं शतगुणितम् अभवत्। किं करणीयं? कुत्र गन्तव्यं? कः साहाय्यं कुर्यात्? स्वकीयं धनं लभेत् न वा इति एतेषां प्रश्नानां उत्तराणि अज्ञातानि एव आसन्। तस्य आरोग्यं नष्टानि। तस्य रक्तचापः वृद्धिङ्गतः अतः तस्य भार्या पुत्रद्वयं असूचयत्। शनिवासरे उभौ अपि आगतौ। पितुः अवस्थां दृष्ट्वा चिन्ताक्रान्तौ सञ्जातौ। पितुः अवस्थायाः कारणं ज्ञात्वा अजयः क्रुद्धः अभवत्। सः पितरं निर्भत्सयत्। मयि भवता अविश्वासः कृतः। तस्य इदं फलम् इति श्रावयित्वा अन्येद्युः सः प्रस्थितः। श्रीधरस्य वञ्चनायाः वार्ता वायुवेगेन प्रसृता। सर्वे आप्ताः तं द्रष्टुम् आगताः। सर्वैः श्रीधरः भृशं निन्दितः। न केनापि तस्य सान्त्वनं कृतम्, न वा कोऽपि उपायः सूचितः। श्रीधरस्य अवस्था नूनं चिन्तनीया आसीत्। विजयः शान्तेन मनसा विचिन्त्य यत्र तत्र गतवान्। आरक्षकः स्थानं गत्वा सूचितवान्। पितुः कृते औषधं च आनितवान्। अन्येद्युः सः पितरम् अवदत्, "तात, यद् भाव्यं तद् भूतम्। भवतः दैवेन दत्तं कर्मणा नीतम्। भवान् चिन्तां मा करोतु। मया सह चेन्नैनगरं चलतु। अम्बयासह तत्र नवजीवनम् भवता आभरणीयम्। अत्रत्याः चिन्ताः दूरनुभवाः अत्र एव त्याज्याः। उत्तिष्ठतु तातः, उत्तिष्ठतु। पुत्रस्य एनम् आग्रहं श्रुत्वा श्रीधरः किञ्चित् आश्वस्तः अभवत्। ममैव कर्मणः इदं फलम्। एतद् सर्वं विस्मृत्यं अग्रे गन्तव्यम् इतिनिश्चयं कृत्वा सः आसनात् उत्थितः।



**-१९ भांगेविहारः, त्रिमूर्ति नगरम्,**
**नागपुरम् -२२**

# अभिमानं कदापि न करणीयम्

**-प्रो. कुलदीप कुमारः**

उक्त शीर्षकस्य अर्थोऽस्ति मनुष्येण अभिमानं न करणीयम्, न तेन कोऽपि लाभः। स्वावलम्बनं त्यक्त्वा सर्वत्र सर्वदा परावलंबनम् अङ्गीकरणं कदापि सुखकारी न भवति। अस्मिन्नेव सन्दर्भे एका लघु-कथा वर्तते-

एकस्मिन् राज्ये एकः राजपुत्रः आसीत्। एकदा सः मृगया क्रीडां कर्तुं अरण्यं प्रति गतः। ग्रीष्मऋतोः मध्याह्नकालस्य वेला आसीत्। सः तृषया व्याकुलं भूत्वा इतः ततः अपश्यत् तस्मिन्नेव समये तेन दृष्टं तत्र एकः कूपः अस्ति। सः तत्र गत्वा रज्जु उदञ्चनं च गृहीत्वा जलं निस्सारयितुम् आरभते, परन्तु तस्मिन्नेव समये तेन चिन्तितम्। ओह अहं तु राजपुत्रोऽस्मि कथं निजहस्तेन जलं निस्सारीयतुं न शक्नोमि एतद् विचिन्त्य तेन उदञ्चनं रज्जुश्च त्यक्त्वा तत्रैव अतिष्ठत्। तदा अन्य जनस्य प्रतीक्षां आरब्धम् तस्मिन्नेव समये तत्र एक अपरः पिपासुः जनागच्छत्। तेन कूपं समीपम् आगत्य राजपुत्रेण पृष्ठं किमत्र जलं उदन्चनं रज्जुश्च सन्ति?

राजपुत्रेण अकथयत् आम् सर्वाणि वस्तुनि अत्र सन्ति शीघ्रं कुरु। त्वं स्वयमपि जलं पिब तथा पायय च मामपि। आगन्तुकेन कथितम्-भो उपस्थितेषु सर्वेषु वांछित-साधनेषु त्वं किमर्थं तृष्यसि?

राजपुत्रेण प्रोक्तम्-भवान् न जानाति अहं कोऽस्मि? अहम् अस्य राजस्य नृपस्य पुत्रोऽस्मि। कथं निजकराभ्यां जलं निस्सारयितुं शक्नोमि। एतत् श्रुत्वा आगन्तुकेनोक्तम् अहो! एवं किम्? अहमपि नवाबपुत्रः कथं मया कार्यमिदं स्वयं हस्तयुगलेन क्रियेत्?

एतत् श्रुत्वा राजपुत्रेणोक्तम् त्यजतु भवानपि अपरः कश्चित् तृतीयः तृषितः जनः अत्र समागमिष्यति पास्यति च आवाम् शीतलं जलम्।

विहितायां प्रतीक्षायां पुनरेकः पिपासितः पुरुषः समागतः। सोऽपि तथैव अपृच्छत् किं कूपे जलमस्ति।

उभौ आम्-आम् परमं, प्रचुरं जलं विद्यते शीघ्रं कुरु, शीघ्रं कुरु आवामपि तृषितौ। भवान् स्वयमपि पिबतु आवामपि पाययतु।

आगन्तुकः कथं भो! प्राप्ते सति जले भवन्तौ पिपासितौ। भवान् न जानति आवां प्रसिद्धः प्राप्त पितुः पुत्रौ स्वः कथं निजकार्य स्वयं कुर्वः।

आगन्तुकः- एवं किल! अहमपि एतेन रोगेन आक्रान्तोऽस्मि। अहं धनिकपुत्रोऽस्मि। ममापि सर्वाणि कार्याणि भृत्याः कुर्वन्ति। उभौ एव हसन्तौ उक्तम्-वरं वरम् आगच्छतु आगच्छतु भवान् अपि कूपं पवित्रं करोतु। तृतीयः अपि तत्र तिष्ठति। त्रयोऽपि दासवशा दासं प्रतीक्षन्ते स्म।

कञ्चिद्कालान्तरं तत्र एकः – चतुर्थः जनः समागतः सोऽपि तृषति। तेन सह अपि उपर्युक्तं वार्तालापं प्रचलति। सः सर्वं श्रुत्वा आदाय उदञ्चनं रज्जुञ्च कूपात् नीरं अपसार्य यथा पिपासं तत् जलं पीत्वा अवशिष्ट जलं भूमौ निक्षिप्तवान्।

एतद् दृष्ट्वा त्रयो जनाः उच्चस्वरेण कथयन्ति भो भो! किमर्थं व्यर्थं जलं क्षिपसि? अस्मभ्यं देहि।

चतुर्थः जनः यूयं–क्रमशः शहजादा, नवाबजादा, अमीरजादा, अतोहि निजकार्य कर्तुं न शक्यन्ते। परन्तु अहं किं कर्तुं न शक्नोमि यतोहि अहं हरामजादा (दुष्टदुर्जनः) अस्मि, अहं तु स्वकीयमुदरं भरामि नान्यस्य तथा चोक्तम्–

**''सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।**
**संक्षेपेण विजानीयाल्लक्षणं सुखदुःखयोः॥**

अस्यां कथायां शिक्षे द्वे स्तः। एका स्वावलंबनस्य अपरा तु निराभिमानस्य।

**–जैनदर्शन विभागः**
**श्रीलालबहादुर शास्त्री राष्ट्रीय संस्कृत केन्द्रीय विश्वविद्यालयः**
**नव देहली–११००१६**



# सहसा विदधीत न क्रियाम्

-डॉ. रामकिशोर मिश्रः

**चक्रवर्ती कवी राजा भारविस्तत्र राजते ।**
**राजेवाऽवति यो लोकान् कवीनाममरं यशः ॥**

[नान्द्यन्ते ]

**सूत्रधारः**- अयि मम प्रियनाट्यकलादर्शकाः! अद्याऽहं भवतां मनांसि नाना नाटकरचयित्रा श्रीमदाचार्य-रामकिशोरमिश्रेण प्रणीतमेकाङ्कं 'सहसा विदधीत न क्रियाम्' नाम नाटकमभिनीयाऽनुरञ्जयामि। पश्यत, पश्यत, पट उत्सृतवान्। मञ्चमागतोऽयं पित्रा सह भारविः। [निष्क्रान्तः]

**-प्रथमदृश्यम्-**

**भारविः** - क्षम्यतामयं स्वपुत्रः पितः!

**पिता** - कि भूतं पुत्र! त्वया किं दुराचरितम्? यस्य क्षमायाचना क्रियते।

**भारविः**- पितः! कि कथयानि? दुष्टोऽहमस्मि, यः स्वपितुर्वधं कर्तुं निश्चितवान्।

**पिता**- अहं तव प्रशंसां न करोमि, तस्मात्त्वमसन्तुष्टोऽभूः, कथय, किमिदमेव सत्यं पुत्र !

**भारविः**- आं पितः! सत्यं भवदीयं वचः। दण्डनीयोऽयमपराधी।

**पिता**- भारवे! मया त्वदीयं नाम भारविः कृतः, यस्याऽर्थो भवति- भा=प्रकाशस्तस्या रविरिति भारविः। अर्थात्स्वकार्यप्रकाशे यो रवितुल्यः, स भारविः। परमत्र त्वया स्वनामार्थो व्यर्थः कृतः।

**भारविः**- मूर्खोऽहमस्मि पितस्तव पुत्रः। अतः क्षम्यतामयम्।

**पिता**- पुत्र! कथय, मत्तस्त्वया कदा किमप्रियं श्रुतम्?

**भारविः**- पितर्नैकवारम्, अपित्वनेकवारं भवता मम माता कथिता यत्तव पुत्रः शास्त्रार्थे निपुणो नास्ति, परं शास्त्रार्थे मत्तोऽनेके विद्वांसः पराजिताः सन्ति पितः!

**पिता**- पुनस्तव विचारः कथं परिवर्तितः? यदद्य मे वधं न कृत्वा क्षमां प्रार्थयसि!

**भारविः**- ह्यः पितस्त्वं मे मातरमकथयो यत्ते पुत्रमहं महापण्डितं द्रष्टुमीहे, प्रिये! अतस्तत्समक्षमहं त्वां तत्प्रशंसावचनं न वदामि, येन स महाविद्वान् भवितुं प्रेरितो भवेत्। अतो मया तव हत्याविचारस्त्यक्तः।

**पिता**- "कथय, केन शस्त्रेण मे वधं कर्तुं त्वया निश्चयः कृतः पुत्र!

**भारविः**- "कुठारेण पितः!

**पिता**- "स कुठारः क्व?"

**भारविः**- ''तस्मिन् कोणे स्थापितः सः।

**पिता**- "तमत्रानय पुत्र!''

**भारविः**- "अयमस्ति पितः! ''

**पिता**- "इममस्मिन् कोणे स्थापय।''

**भारविः**- "अत्र स्थापितोऽयम्। का पुनराज्ञा पितः!"

**पिता**- गच्छ पुत्र! सपत्नीकस्त्वं स्वश्वशुरालयम्। तत्रैव षण्मासान् वस प्रायश्चित्ताय।"

**भारविः**- अस्तु पितः! गच्छामि तत्र पत्न्या सह।''

**माता** - क्षम्यतामयं पुत्रः स्वामिन्! स भवद्वधात्पूर्वमेव स्वकीयमपराधं भारविः स्वीकृतवान्!

**पिता** - नहि प्रिये! अयं तव पुत्रो ममाप्यस्ति, परमयं स्वदूषितविचारेण दण्डनीय एवास्ति। श्वशुरालयं गत्वा यदानीमयं निवत्स्यति, तदानीं तत्र विविधमानापमानानुभवेताऽस्याऽन्तरात्मा दोषमुक्तो भविष्यति।

**माता**- कियत्कालपर्यन्तमस्य प्रवास प्राणनाथ!

**पिता** - चिन्तां मा कार्षीः प्रिये! षण्मासानन्तरमयं पुतः स्वगृहमायास्यति। तदाऽयं कविर्महापण्डितश्च भविष्यति। [पुत्रं प्रति] गच्छ पुत्र! पत्न्या सह स्वश्वशुरालयम्, तत्रैव षण्मासपर्यन्तं वस। अयमेव ते पितृवधविचारदण्डः।

**भारविः** - गच्छामि पितः! पत्न्या सह तत्र प्रायश्चित्तं कर्तुम्। [गच्छति] ।

**पटाक्षेपः।**

## -द्वितीयदृश्यम्-

[ततः प्रविशतः क्रेता विक्रेता च । ]

**क्रेता देवदत्तः** - 'अस्ति किमिदं भद्र!'

**विक्रेता भारविः**- 'पुस्तकमिदम् ।"

**देवदत्तः**- "किमेकपत्रीयं पुस्तकमेतत्?''

**भारविः**- एकश्लोकीयं पुस्तकं श्रीमन्!''

**देवदत्तः**- "दर्शय तं श्लोकम्, यमुद्दिश्य पुस्तकं ग्रथितम् ।"

**भारविः** - "क्रयेण विना भवांस्तं द्रष्टुं नार्हति ।''

**देवदत्तः**- तद् भद्र! किं मूल्यं तस्य?"

**भारविः**- रूप्यकाणां सहस्रमेकम्।''

**देवदत्तः**- "अस्मात्किञ्चिदल्पं शक्नोति किम्?''

**भारविः**- ''नैव श्रीमन्!"

**देवदत्तः**- "तद् गृहाण सहस्रमेव।''

**भारविः**- "प्रदेहि श्रीमन्!''

**भारविः**– "प्रदेहि श्रीमन्!''

**देवदत्तः**– ''गणय, सहस्रमेतत्, पुस्तकञ्च देहि ।"

**भारविः**– ''गृहाण पुस्तकं श्रीमन् !"

[विक्रेता तत्पुस्तकं क्रेत्रे प्रदाय हट्टादगच्छत्। क्रेता तं ग्रथितं श्लोकं पठित्वा पुस्तकं स्वशयनकक्षे नागदन्ते लम्बितवान् ।]

[ततः प्रविशतो भारविस्तस्य पत्नी च। ]

**भारविः**– ''प्रिये! गृहाण सहस्रं रूप्यकाण्येकस्य श्लोकस्य मूल्यम्।''

**पत्नी**– ''अनेन रूप्यकसहस्रेण कतिपयदिनानां भोजनादिव्ययो भविता, प्रियतम! भवान् श्लोकविरचनं सततमेव कुर्यात्, येनाऽऽवयोर्धनलाभोऽपि भवेत् ।"

**भारविः**– "सम्प्रत्यहं काव्यन्तु करोम्येव, यस्याऽयमेकः श्लोको भवत्या विक्रयाय प्रेषितः सुभगे!

**पत्नी**– "किं काव्यं करोषि प्रियवर! अहमपि शृणुयां भवदीयकाव्यस्य नाम।"

**भारविः**– ''मम काव्यं, यदहमिदानीं लिखन्नस्मि, तत्किरातार्जुनीयं भविता प्रियतमे!''

**पत्नी** – "भाग्यस्य विडम्बनापि कीदृशीयम्, यया प्रेरितेन पित्रा कविरपि स्वपुत्रो गृहान्निष्कासितः।"

**भारविः**– प्रिये! षण्मासार्थमेव निष्कासितोऽस्मि। तावत्कालाय रूप्यकाणां सहस्रमेकं भोजनादिव्ययाय पर्याप्तमस्ति सुभगे!''

**पत्नी**– यद्येतत्सहस्रमपर्याप्तमपि स्यात्तदपरं श्लोकं विक्रयाय प्रेषयिष्यामि प्रिय!''

**भारविः**– काव्यं यशसे धनाय चापि भवति भद्रे !''

[इत्थं वार्तामालपन्तौ दम्पती सुप्तौ ।]

**पटाक्षेपः**



**–२९५/२४ पट्टीरामपुरम्**
**खेकड़ा ( बागपत ) उ.प्र.–२५०१०१**

# समरसः एव जीवनम्

-डॉ. जी. म.कट्टि

"श्रीमन् ह्यः भवता अनुभवकथारोमाञ्चः आसीत्। पुनः एकां कथां श्रावयिष्यामि इति भवता कथितम् आसीत्।" बालकाः अवदन्। "सम्प्रति अहं समासेन कथयिष्यामि" इति अहं प्रत्युत्तरिवान्।

एकदिनं यावत् अहं चिकित्सालयस्य नित्यकर्माणि समाप्य मा किं दिवा द्वेवादनसमये गृहम् आगतवान्। भोजनं समाप्य हस्तक्षालनं कुर्वन् आसम्। द्वारकिंकिणी शब्दम् अकरोत्। "अस्माकम् जनाः समयासमयं न जानन्ति। यदा ते विरामं लभन्ते तदा एव चिकित्सालयं आगच्छन्ति। कष्टं च दयति। (दधति)। वैद्यः अपि एकः  मनुष्यः एव। अहारः विश्रान्तिः च अवश्यम् ननु? सामान्यज्ञानं च विदन्ति। इति मनसि एव वदन् द्वारम् उद्घाटितवान्।

तत्रासीत् त्रिंशत्याधिकवर्षीया एका महिला रूप्यकारकुङ्कुमाङ्कित ललाटा काचकवलयप्रकोष्ठा कुसुममालाङ्कतमूर्धजा च। सा समान्यमहिला इव दृश्यते स्म। तस्याः पृष्टतः अनतिदूरे स्थितः आसीत् धृतशुभ्रयुतकः शुभ्रवस्त्रधृतः मा किं चत्वारिंशत् वर्षीयः सुन्दर-युवा।

महिलायाः मुखं ज्ञानपूर्वमेव। किन्तु कदा ताम् अपश्यम् इति मम स्मृतिपथं न आगच्छत्।

सा अवदन्। "श्रीमन् अपसमये भवन्तं पीडयितुम अहं सिद्धा न आसम्, भवति न्यस्तविश्वासः एव सदूरास्थितग्रामात् आगन्तुं प्रचोदयति स्म। दशवर्षात् पूर्वं भवान् मम पितृचरणस्य कृते चिकित्साम् अकरोत्। अस्माकं गृहं प्रति आगच्छन् आसीत् भवान्। अहमपि भवतः चिकित्सालयं प्रति आगच्छन्ती आसम्। अतः एव भवतिन्यस्तविश्वासाऽहम्।" इति अब्रवीत्।

आगच्छ महाभागे, उपविशतु भवती। "इति उदित्वा। अहम् अन्तः गत्वा। वस्त्रपरिवर्तनं कृत्वा आगतवान्।

सा अवादीत्। "अहं श्रीमन्। त्रयत्रिंशत्वर्षीया अस्मि। मह्यं भोजनं न रोचते। मा किं मासद्वयात् आयासः। कार्यं कर्तुं न उत्सहे। अहं ग्रामे शिक्षिका अस्मि। सम्प्रति आवां एव द्वौ गृहम् अधिवसावः। यः बहिः स्थितः अस्ति सः मम पतिः।"

बहिः स्थितः युवा अत्यन्तं सुन्दरः आकर्षक-व्यक्तिगताक्षेपवान् च आसीत्। कथं इमं (इयम्) सः इष्टवान् अभवन् इति विचारः मम मनसि आगतः।

अहं तां परीक्षां कृतवान्। सा गर्भवती आसीत्। तस्याः रुग्णकागदं सज्जीकर्तुं उद्यतः अभवम्। तस्याः नाम अपृच्छम्। तस्या नाम श्रुत्वा अहं स्वाम्बीभूतः अभवम्। अहम् अशनीहतः अभवम्। इतः पर्यन्तं तया उदीरितवचनानि श्रुत्वा सा पण्डितः गुण्डाचार्यस्य सुपुत्री इति अहं व्यचिन्तयम्। इदानीं सा वदति मम नाम ''ममताज गुल्ल'' इति। गुण्डाचार्यस्य सुपुत्री अस्ति अरुन्धति इति नामिका। अहम् अनन्यगतिकः अभवम्। इतः प्राक् तस्याः वचनानि श्रुत्वा अहं सा गुण्डाचार्यस्य सुपुत्री इति भावयामि स्म। नाम्नि पृच्छते चेत् सा ममताज गुल्ल इति वदति। गुण्डाचार्यस्य सुपुत्र्याः नाम आसीत् अरुन्धती इति। 'किं' वदानि किं पृच्छानि इति अहम् अनन्यगतिकः अभवम्। मम वैकल्ण्यं लक्ष्यीकृत्य (लाक्षीकृत्य) सा अवदत्। ''श्रीमन्। अपि भवान् आश्चर्याविष्टः अभवत् ननु। किन्तु अपरिहार्यः आसीत्। मम पितृचरणः। पण्डितः आसीत्। कृत परिश्रमः च। तथापि पौरोहित्य प्रचण्डः च आसीत्। स मुग्ध धर्मपरः सरलः च आसीत्।

सः सङ्कोचाविष्टमनस्कः च आसीत् न जाने अपि तस्य परीक्षार्थम् एव निर्धनत्वं मम गृहम् अधिवसन् आसीत् एव। बालिकानां कृते शालाशिक्षणं न अवश्यम् इति मत्वा। अहं शालां प्रति न अगच्छम्। यदा मम अग्रजा द्वादशवर्षीया आसीत् तस्याः विवाहः सुसम्पन्नः अभवत्। हन्त! दुर्दैवम्। षण्मासाऽनन्तरं तस्या पतिः अपघाते प्राणान् अत्यजत्। सः तु षोडशववर्षीयः आसीत्। अग्रजां तन्तु हीनाम् कारितवन्तः। तस्याः जीवनं वन्ध्यम् अभवत्। तस्याः जीवनं कोणे ग्रन्थीकृतम्। सम्प्रति सा पचिका इव उदरम्भरणं कुर्वती अस्ति।

कालेऽस्मिन् युवतिः जीवनं कर्तुं कष्टम् इति अजानन्तः एव आसन्। पितृचरणः बदरीयात्रां सम्पाद्य प्रत्यागच्छत्। तस्य साम्प्रदायश्रद्धा दीर्घीभूता। मम अग्रजायाः दुस्थितिं तथापि अस्माकं निर्धनत्वं पश्यन्ती मम माता दिवंगता। (प्राणान् अत्यजत्)। अनन्तरं मम पितृचरणः गृहे पाचकः भूत्वा मां पोषितवान्। सः अपि विप्रत्वेन भोजनामन्त्रणं सम्पादयितुम् असमर्थः अभवत्।

भवतः पितृचरणः मम पितरि न्यस्तविश्वासः आसीत्। अतः केवलं युष्माकं गृहं प्रति भोजनार्थम् आगच्छन् आसीत्। भवतः पितृचरणः एव मां पक्तुं प्रोत्साहं प्रकल्पितवान् तथापि मम पितुः मनःपरिवर्तनं कृत्वा मां पाठशालां प्रति प्रेषितवान्। तथापि मत्कृते पाठशालाशुल्कम् अपि स्वयमेव प्रायच्छत्। पुस्तकानि कागदानि च च प्रायच्छत्। यदा अहं 'मैट्रिक' परीक्षायाम् उत्तीर्णा अभवम् मम वयः आसीत् स्नातपदवीं सम्पादित महिलायाः वयः आसीत्। तदनन्तरं भवतः पितृचरणः मां महिला शिक्षिकाप्रक्षशिणार्थं प्रेषितवान्। अहं तत्र यथेष्टं गुणान् सम्पाद्य समुत्तीर्णा अभवम्। अनन्तरं 'कलाघटगी' उपमण्डलस्य ग्रामे शिक्षिका इव लब्धोद्योगा अभवम्।

मम पितृचरणः आमयग्रस्तः अभवत् कलघटकीशासकीया चिकित्साकेन्द्रः आसीत्। तत्रैव सः प्रवेशितः। मम पाठशालीयमुख्याध्यापकः सहाय्यं कृतवान्। ममग्रामः आसीत् कलघटगीनगीरात्

पञ्चकिलोमीटर दूर:। सर्वकारीय यानेनाधिगते अहं पादाभ्याम् एव गमनागमनं कुर्वती आसीत्। मयि याने अलब्धे मुख्याध्यपक: सांयकलसमये पादाभ्यां एव मत्सहमेव आगच्छन् आसीत्।

मम पितृचरण: टि.बी. इत्याख्यामयग्रस्त: अभवत्। चिकित्सामोधीभूता: स: प्राणान् अत्यजत्। अहम् आपन्नसङ्कटा अभवम् सङ्कटसमये सहाय्यम् अकरोत् मुख्याध्यापक: मत्कृते शालाकर्मविरामं सज्जी कृतवान्। धनसहाय्यं च अकरोत्। मुख्यत: मयि धैर्यं नितरिवान्। तस्मिन् कृते सहाय्ये कियत् स्मर्यतेऽपि अपर्याप्तम्। कलाघटगीनगर्या: मा किं किलोमीटर द्वयदूरम् आसीत् तस्य कृषिक्षेत्रम्। तत्रैव तस्य गृहम् आसीत्। तस्य मातामहस्य कृषिक्षेत्रे मातु: सहमेव वसन् आसीत्। तस्य माता आसीत् दुर्दैवहना परित्यक्तमहिला सा मुस्लीममनीया:। तस्या: पिता सुसंस्कृत: सज्जन: च। स: 'मैट्रिक' पर्यन्तं कृतविध: आसीत्। अपि च कृषि क्षेत्रे कार्यतत्पर: आसीत्। मम मुख्याध्यापक: 'मक्तुसाहेब' इति नामभूषित:। मातामहस्य कृषिक्षेत्रे वर्धापित: मातामहस्य आश्रयेव। अनेकवारं आवां विजने आस्वा स: कदापि मां प्रति कुदृष्टिक्षेपं न कृतवान्। ग्रामे आवयो: कृते वृथाकथासंल्लाप: प्रचलित: आसीत्। एवं स्थितेऽपि स: धैर्यं प्रोक्तवान्। मयि पितरि दिवंगते न कोऽपि ब्राह्मणजन: सहाय्यम् अकरोत्। मक्तुमसाहेब महाभागा एव स्वब्राह्मणमित्राणि आहूय अन्त्येष्टिं कारितवान्। पुरोहितस्य कृते भूरिदक्षिणां प्रायच्छन्। ग्रामपरिसरे महिला एकाकिनी वस्तुं कियत् कष्टप्रदम् इति सर्वे विन्दन्ति एव। इति भयभीतान्विता भूत्वा वस्तुम् अपि साध्यम्? एकदिनं यावत् मम कष्टं मुक्तुममान्यवस्य मातृसमक्षम् उदीरितवती। सा अवादीत्- " किं कर्तव्यम्?। उभयोर्मध्ये धर्म: निर्यक्भीत्ति: इव स्थास्यति अपि तत्वज्ञानबोधनेन शुशुक्षा अपगच्छति?

आकर्ण्य मक्तुम्महाभागस्य मातामह: अवदत्। " इमां तिर्यक्भित्तिं भवती संविभज्य अपि पादेन प्रहरति? अस्माकम् अश्रयतु। अहं ब्राह्मणानां विषये बद्धादर: अस्मि। किञ्चित् संस्कृतं च अधीतवान् अस्मि। दासवरेण्यानां भक्तिपदानाम् अर्थ गाम्भीर्येण आस्वादितवान्। कृषिकार्य समये अहं भक्तिगानं मनसि जल्पयामि (जल्पामि) भीमसेनजोशी महाभागस्य दासवाणी मे अत्यन्तं रोचते। अहं गातुम् अपि शक्नोमि। न्यूनातिन्यूनम् अहं प्रतिवर्षं एकवारं मन्त्रालयं गच्छामि। पुण्यदर्शनं सम्पाद्य आगच्छामि। भवन्तौ विवाहितौ अभविष्यत: चेत् अहं किञ्चिदपि प्रतिबन्धं करिष्यामि न। भवन्तौ ज्ञान सम्पन्नौ स्त:। अस्माकं मकुं बी.ए. पदवीधर: अपि मातु: सेवार्थं प्राथमिकशिक्षक: इव कार्यं करोति। लघुग्रामम् अधिवसति। तस्य कृते माता एव परादेवता। मया उक्तं तस्य कृते वेदवाक्यम्। भवती सुविचिन्त्य निर्णयं स्वीकरोतु। भवन्तौ परस्परसम्भाषणं कृत्वा विवाहितौ भवताम्। सारल्येन विवाह: भविष्यति।"

सम्प्रति आवां कृषिक्षेत्रपरिसरं अधिवसन्तौ स्व:। समरस: एव जीवनम् इति भावयाव:। सानन्दं स्वच्छन्दं जीवनं यापयन्तौ स्व:। स्वामिन्, अपि अहम् अपराध:?"

"नहि कदापि नहि। भवन्तौ सम्प्रहृष्टौ स्त:। तेन अलम्। सर्वत्र दुर्जना: सज्जना: वर्तन्ते एव। प्रसङ्गम् अनुसृत्य जीवने परिवर्तनानि भवन्ति एव" औषधानि सूचितवान्।

एके वर्षे समाप्ते दम्पती समागच्छताम् तौ सुन्दरकन्यारत्नसहितौ। नमस्कृत्य दुग्धलड्डुकान् वितीर्य सकार्तज्ञं अगच्छताम्। कन्यारत्नस्य हस्ते शतं रूप्यकाणि निक्षिप्य 'शतंजीव' इति आशीर्वचनानि व्याहरामि स्म।

अहमपि बहुवारं चिन्तापरः भवामि। अस्माकं मनस्याऽनिष्टपद्धतीम् उत्पाट्य प्रगातिपरकर्तव्यामि परिवर्तनानि कर्तव्यानि। अत्यन्तम् अवश्यम्। आडम्बरान् दूरीकृत्य तथापि प्रेमपूर्णमानवत्वं विचिन्त्य साधुशीलता एव अग्रमान्या  भवतु।

।। इति ।।

**-कोकनूर-५९१२३०**
**जिला- वेलगम-कर्नाटकम्**

# पुरस्कारयोग्य: कः

**-डॉ. केशव देवः**

जयपुरनगरे एकः सुप्रतिष्ठितः राजकीयः विद्यालयः अस्ति। तत्रात्या शिक्षणाधिगमप्रकिया प्रशस्या आसीत्। न केवलं राजस्थाने अपितु समग्रे भारतवर्षे तस्यैव राजकीयविद्यालयस्य वर्चस्वं व्याप्तमासीत्। तस्मादेव कारणात् प्रायशः सर्वेषामेव छात्राणां कृते अयमेव विद्यालयः प्रथमतया काम्यः, अभीष्टश्चासीत्। तत्र नियमानुसारेण प्रत्येकमपि कक्षायां यद्यपि पूर्णसंख्याकाः चत्वारिंशदेव पिपठिष्वः छात्राः आसन्, तथापि अन्येऽपि बहवः दूरस्थाः छात्राः येन केनापि प्रकारेण तस्मिन्नेव विद्यालये प्रविष्टुमिच्छन्ति स्म। यतोहि, तत्रा गुरुशिष्ययोः सम्बन्धो भगवद्भक्ताविव वर्तते स्म। शिष्याः गुरोः चरणकमलयोः स्वकीयान् प्राणान्नपि समर्पयितुं तत्पराः भवन्ति स्म। गुरुरपि छात्रहिताय स्वकीयं सर्वस्वम् अर्पयति स्म।

अस्मिन् विद्यालये प्रथमकक्षायाः आरभ्य दशमकक्षां यावद् अध्ययनाध्यापनकर्म अनुष्ठीयते स्म। अत्राधियानाः प्रायशः सर्वे एव छात्राः विलक्षणबुद्धिमन्तः आसन्, तथापि तत्रत्याः दशमकक्षायाः चत्वारः छात्राः अतीव मेधाविनः आसन्। यद्यपि एते छात्राः अतीव निर्धनाः आसन्, किन्तु ज्ञानधनधनिनामेतेषां छात्राणां स्थानं विद्यालये सर्वोत्कृष्टमासीत्। तेषामद्भुतबुद्धिकौशलप्रभावादेव विद्यालये यत्किमपि आयोज्यते स्म, तस्य कार्यक्रमस्य सर्वमेव आयोजनदायित्वमेतेषामुपरि संन्यस्यते स्म। पुनश्चैते चत्वारः सुयोग्याः छात्राः तद्दायित्वं सहर्षं कुशलतया च निर्वहन्ति स्म। विद्यालयस्तरे, अन्तर्विद्यालयस्तरे, प्रान्तस्तरे अथवा अखिलभारतीयस्तरे याः का अपि प्रतिस्पर्धाः भवन्ति स्म तत्र सर्वत्रैव एतेषां योग्यतमानां चतुर्णां पुरस्कारः सुनिश्चितः एवासीत्। अत एवैतेषां योग्यताप्रभावात् कोणे-कोणे विद्यमानाः अन्ये मेधाविनः छात्राः स्वयोग्यताविषये साशंकाः एव तिष्ठन्ति स्म। एतेषां बृहस्पतिकल्पानां छात्राणां नामानि क्रमशः आसन्-जयसिंहः, विजयसिंहः, अजयसिंहः, अजेयसिंहश्च। एते चत्वार एव छात्राः, न केवलं दशमकक्षायाः, अपितु सम्पूर्णविद्यालयस्यैव गर्वभूताः, ध्वजोन्नायकाः, प्रतिष्ठासंवाहकाश्च आसन्। यतोहि,



एतेषां ज्ञानस्तरः, अधिगमस्तरः, बुद्धिपेशलत्वञ्च अप्रतिममासीत्। एते सर्वे स्वज्ञानकौशलेन विद्यालयस्य कीर्तिमहर्निशं वर्धयन्ति स्म। एषु चतुर्षु प्रत्येकं छात्राः अन्येभ्यः पृथगासीत्, किन्त्वन्येषु सर्वेष्वैव श्रेष्ठ आसीत्। अतः एतेषां मध्ये उत्तमः कः? अथवा वरीयान् कः इति न केनापि, न कदापि निर्णेतुं शक्यते स्म।

अथैकदा पूर्वनिर्धारित-विद्यालयसमयसारिण्याऽनुसारेण निर्धारितोऽभवत्। साम्प्रतं परम्परानुसारेण वार्षिकोत्सवे विद्यालयस्यैव कोऽपि एकः वरेण्यः छात्राः आदर्शच्छात्रात्वेन पुरस्कारयोग्यः इति उद्घोषणीयम् आसीत्। सम्प्रति विद्यालयस्यैते चत्वार एव छात्राः सुयोग्याः आसन्, किन्तु चत्वारस्तु तत्र पुरस्कारार्थं नैव आह्वनीयाः इति स्पष्टमेवासीत्। एतदर्थं विद्यालये विद्यमानाः सर्वे एवं जनाः चिन्तामग्नाः सञ्जाताः। प्राचार्योऽपि किंकर्तव्यविमूढोऽजायत। सः प्रतिपलमीश्वरं निवेदयति- 'हे भगवन्! सम्प्रति कथमहं निर्णेष्यामि यदेतेषु चतुर्षु कः योग्यतमः? कोऽधिकः, कश्च न्यूनः? यदि कोऽपि चमत्कारः कदाचित् भवेदधुना तदैवाहमेकमेव छात्राम् आदर्शच्छात्रात्वेन पुरस्कर्तुं समर्थो भवेयम्। आदर्शच्छात्राः कः? आदर्शच्छात्राः कः भविष्यति?' इत्येवं मनसि पापृच्छन् प्राचार्यः प्रतिपलम् ईश्वरं स्मरति, अस्य द्वन्द्वस्योपायञ्च प्रार्थयते। सः रात्रावपि इदमेव चिन्तयन् ईश्वरं सास्मरन् च यथा-कथा निद्रोमुखे न्यपतत्। शयनकाले च पुनः रात्रौ भगवान् शिवः स्वप्ने तस्य समक्षमागत्य अवदत्- वत्स! किमर्थमतीव चिन्तयसि? कथं त्वं व्याकुलोऽसि? त्वं चिन्तां मुञ्च, श्वः अहं तव समस्यां दूरीकरिष्यामि। इत्युक्त्वा भगवान् अन्तर्धानोभवत्।

विलम्बेन शयनकारणात्, स्वप्नसुखानुभववशाच्च सः प्राचार्यः प्रातःकाले किञ्चिद् विलम्बादेव जागृतः। विलम्बेन च सः विद्यालयं समागतः। यदैव सः विद्यालयस्य प्रवेशद्वारमुपागच्छति तदैव तं प्रतीक्षमाणः एकः शिक्षकः तस्य समीपमागत्य सूचितवान्- "महोदय! साम्प्रतं प्रातःकाले एव दूरभाषद्वारा सूचनेयं सम्प्राप्तास्ति, यद् शंकराचार्यपीठ इति नामधेयस्य विश्वविख्यात विद्यालयस्य कोऽपि ज्येष्ठो गुरुः अस्माकं विद्यालयम् आगमिष्यति। सः अत्रागत्य विद्यालयस्य एकमुत्तमं छात्रां चीत्वा तस्य आजीवनं निःशुल्कामेव शिक्षाव्यवस्थां सम्पादष्यति। पुनश्च स एव उत्तमच्छात्राः कालानन्तरं शंकराचार्यपीठस्य अधिष्ठाता अर्थात् कुलपतिः भविष्यति ।"

इदं श्रुत्वा प्राचार्यः अन्ये च विद्यालयस्य गुरवः मनसि महान्तं सन्तोषम् अन्वभवन्। तेषां चिन्ता सम्प्रति प्रसन्नतायां परिणता। यतोहि सर्वतः कठिनो निर्णयः अधुना स्वयमेव भविष्यति। शंकराचार्यपीठस्यायं गुरुः स्वमानदण्डानुसारेण परीक्षणं कृत्वा कमप्येकं श्रेष्ठच्छात्ररूपेण चेष्यति। अतः सर्वैः इदमेव निर्णीतम् यदेते चत्वारो मेधाविनः छात्राः एव परीक्षणार्थमधुना शंकराचार्यपीठस्यायं गुरोः समक्षं प्रस्तोतव्याः, यतोहि एते छात्रास्तु विद्यालयस्य गौरवभूताः पुरोधाः इव सन्ति। अतः शिक्षक-प्राचार्यादिभिः चत्वारस्ते मेधाविनः छात्राः तत्परीक्षणार्थं सम्यक्तया प्रशिक्षिताः।

किञ्चित्कालानन्तरं सः शंकराचार्यपीठस्य गुरुदेवः विद्यालयपरिसरं प्राप्स्यतीति समाचारं प्राप्त्वा सर्वे-सन्नद्धाः अभवन्। तस्यागमनात्पूर्वमेव विद्यालयं परितः छात्राः गुरुजनाश्च यथास्थानं नियुक्ताः जाताः। सर्वे एव तस्य स्वागतार्थं हस्तेषु पुष्पदलानि गृहीत्वा तत्पराः सञ्जाताः। यदा सः विद्यालयं समागच्छत् तदा सर्वैरेव छात्रैः शिक्षकैश्च पुष्पदलैः वचनामृतैश्च तस्य स्वागतं विहितम्। तदनन्तरं सः प्राचार्यम् अमिलत्

अवदच्च स्वप्रयोजनम्। प्राचार्यः जलपानादिभिः तस्याभिनन्दनं कृतवान्। ततश्च सः गुरुदेवः प्राचार्यानुमतिं प्राप्य परीक्षणसत्रम् आयोजितवान्। शिक्षकाः अवदन् यदस्माकं विद्यालयस्य चत्वारः वरिष्ठाः मेधविनः छात्राः सन्ति। तेष्वेव कोऽप्येकः चेतव्य इति।

सः गुरुदेवः तान् चतुरः बालकान् परीक्षायै आहूतवान्। ते चत्वारो बालकाः तत्रागताः। गुरुदेवः अवदत्–बालकाः! युष्मासु एकः योग्यतमः छात्रः कः? इति निर्णेतुमद्य स्पर्धात्रयं भविष्यति। अस्य स्पर्धत्रऽयस्य प्रथमो नियमोऽयमस्ति यत् प्रथमां स्पर्धामुत्तीर्य एव कोऽपि छात्राः अग्रिमायै स्पर्धायै योग्यो भविष्यति। पुनश्च स्पर्धयां भवतां सर्वेषां ज्ञानस्य, बोधस्य, अधिगमस्य, सत्यनिष्ठायाः, प्रत्युत्पन्नमतेश्च परीक्षणं भविष्यतीति। यश्च तिसृषु स्पर्धासु सफलो भविष्यति, स एव आजीवनं निःशुल्क शिक्षा प्राप्तुं सुयोग्य इति निर्धारितो भविष्यति। अतः स्पर्धात्रयाय किं यूयं सर्वे तत्पराः? बालकाः अवदन्– ''आम् श्रीमन्! वयं तत्पराः स्मः। गुरुदेवः अवदत् अस्तु।

सर्वप्रथमं प्रथमा स्पर्धा एवम्प्रकारेणास्ति– यूयं सर्वे विद्यालयाद् बहिः गत्वा किमप्येकम् अमूल्यं वस्तु आनयत तत्र ध्यातव्यमिदमस्ति यत् तद्वस्तु सर्वेषां कृते उपयोगि भवेदेव चत्वारो मेधाविनः छात्राः विद्यालयाद् बहिः निर्गताः, पुनश्च कतिचिच्छणानन्तरमेव विद्यालयं प्रत्यावृत्ताः। जयसिंहः जलमेव आनयत्, अकथयच्च– श्रीमन्! इदमेव सर्वोपयोगि वस्तु। गुरुदेवः स्मितवदनोऽवदत्– साधु! सत्यमस्ति ते कथनम्। ततः विजयसिंहः आगत्य वृक्षस्य पर्णं दर्शयित्वा अकथयत्– श्रीमन्! अनेनैव प्राणवायुः सृज्यते, प्रदीयते च जीवान्। गुरुदेवः तस्यापि स्वागतमकरोत्। पुनः अजयसिंहः मुष्टिपरिमितां धूलिम् आनीय अवदत्–प्रभो! अयमेव जीवनस्याधारः। अयमेव उर्वरितो भूत्वा अस्मान् खाद्यपदार्थान् प्रददाति। गुरुदेवः तस्य वचनं श्रुत्वा प्रसन्नतया अवदत्– आम्! त्वमपि सत्यं वदसि। तदनन्तरमागतः अजेयसिंहः आगच्छति। सः अग्निपेटिका–मानीय अग्निं प्रज्वाल्य च कथितवान्– महोदय! अग्निरेव सर्वत्रा पाककर्मसु प्रयुज्यते। पुनश्च अग्निरयम् अस्माकं जीवनं रक्षति, पोषयति च। एतत् श्रुत्वा गुरुदेवः सगद्गदम् अवदत्–'शोभनम्! युष्माकं ज्ञानस्तरेण इदमेव प्रतीयते यत् चत्वारः एव यूयं प्रत्युत्पन्नमतयः, अतः उत्तीर्णाः सर्वे। सम्प्रति द्वितीया स्पर्धा भविष्यति।''

द्वितीयायां स्पर्धायां युष्माभिरिदं वक्तव्यम् यन्मनुष्यस्य मनः कथं दुःखी भवति। किन्तु, सर्वैरिदम् अवश्यमेव अवधारणीयम् यत् एकस्य प्रदतम् उदाहरणं तर्कं वा कोऽपि अन्यः प्रतियोगी नैव अनुकरिष्यति। ते चत्वारः तत्क्षणमेव अवदन्– 'मान्यवर! वयं सन्नद्धाः स्म।' स्पर्धा समारब्धा जाता।

सर्वप्रथमं जयसिंहः अवदत् – 'प्रभो! यः अलसः भवति, यः किमपि कर्तुं नेच्छति, स एव दुःखी तिष्ठति। यतोहि आलस्यपरायणः, अकर्मण्यश्च सः यदा–यदा किमपि कर्म कर्तुं प्रवर्तते चेत्तदा तदा तस्य मनः दुःखमनुभवति।'

द्वितीयः विजयसिंहः आगत्य अवदत्– 'स्वामिन्! यः अतिनिद्रालुः भवति, तस्य मनः कदापि सुखं नानुभवति। यतोहि निद्रासुखादन्यत् तु किमपि तस्मै न रोचते। पुनश्च निद्रा तु सर्वदा नैव मिलति। यतोहि प्रत्येकं मनुष्यः जीविकायै निद्रायाः त्यागं कृत्वैव स्वकीयं भरणं पोषणं कर्तुं क्षमो भवति।'

पुनः अजयसिंहोऽवदत्– 'हे गुरो! यस्य मनः यस्मात् कस्मादपि भयाद् अधिकं बिभेति, सः कदापि आनन्दं नैव प्राप्नोति। यतोहि एतादृशं भीतं जनं तु सर्वदा भयमेव त्रासयति। सः भयमुक्तेष्वपि स्थलेषु स्वयमेव भयम् आविष्करोति, दुःखञ्चानुभवति।'

अजेयसिंहोऽवदत्– 'महोदय! अहं मन्ये यत् यः कोपि अहंकारशीलः भवति, सः कदापि सुखं नैव आस्वादयति। यतोहि अहंकारयुक्तः मनुष्यः सर्वदा सर्वत्रैव इदमभिलषति यत् अहमेव श्रेष्ठः, इत्यमुमेव विचारं पोषयन् सः कृतप्रयत्नः दृश्यते, येन सुखोपलब्धिः नैव जायते।

एवम्प्रकारेण चतुर्णामेव छात्राणां तर्कपूर्ण, न्यायपूर्ण, विलक्षण च अधिगमस्तरं दृष्ट्वा गुरुदेवोऽवदत्– यूयं चत्वारः एव ज्ञानधुरीणाः। अतः अस्यामपि स्पर्धायामुत्तीर्णाः यूयम्। सम्प्रति अन्तिमा स्पर्धा करणीया, यया योग्यस्य छात्रस्य निर्णयो भविष्यति। अतः सर्वैः सावधानेन भाव्यम्। अस्यां स्पर्धयाम् अल्पोपि दोषः, न्यूनापि त्रुटिश्च पराजयस्य कारणं भवितुं शक्यते।'

सम्प्रति अस्यां स्पर्धायां किं भविष्यतीति ध्यातव्यमस्ति। स्पर्धायामस्यामेकं दुग्धपूर्ण पात्रं भविष्यति। तस्मिन् पात्रे आकण्ठं दुग्धं वर्तते। यदि पात्रेऽस्मिन् किमपि वस्तु निपतति, तर्हि किञ्चिन्मात्रामपि दुग्धमस्माद् दुग्धपात्रात् निर्गत्य अवश्यमेव भूमौ पतिष्यत्येव। अतः पात्राममुखं हस्तेन आवृत्य एककिलोमीटरं यावत् सावधानेन गन्तव्यम्, पुनः आगन्तव्यञ्च। किन्तु, अत्र विशेषतः इदमपि ध्यातव्यम् यत् स्पर्धासमये एकोपि दुग्धकणः पात्रात् बहिर्न निर्गच्छेत्। न च कस्यापि हस्तः क्लिन्नो भवेत्। अस्याः अन्तिमायाः अतिकठिनायाः स्पर्धयाः युष्माकं योग्यतायाः सफलं परीक्षणं भविष्यति, शीघ्रमेव निर्णयञ्चानयैव भविष्यति।

एतच्छ्रुत्वा ते चत्वारः एव छात्राः उत्सुकाः, उत्कण्ठिताश्च संजाताः। तेषां चतुर्णां कृते दुग्धपूर्णपात्राणां प्रबन्धः कृतः। ते चत्वारः छात्राः स्वकीयं दुग्धपात्रं नीत्वा भिन्नदिशि प्रस्थिताः। किञ्चित् कालानन्तरं ते चत्वारः छात्राः दुग्धपूर्णपात्रेण साकं स्वकीयं भ्रमणं विधय प्रत्यागताः। गुरोः समक्षम् आगत्य सर्वे स्वकीयं तथ्यम् एवम्प्रकारेण प्रकटितवन्तः।

सर्वप्रथमं जयसिंहः तत्रागत्य स्वहस्तम् अदर्शयत् अकथयच्च– 'श्रीमन्! अहमिदं मन्ये यत् अहमेव अस्यां स्पर्धयां सफलोभवम्। यतोहि सत्यमपि कठिनायामस्याः स्पर्धयाः निकषे अहं साफल्यमधिगतवान्। यतोहि दुग्धपूर्णपात्रां धृत्वाऽपि न तु मम हस्तः क्लिन्नो भवत्, न च दुग्धमेव भूमौ पतितम्।

विजयसिंहोऽवदत्– 'श्रीमन्! मम विषये परिणामस्तु पृथगेवस्ति। यतोहि मम पात्रात् दुग्धन्तु नैव पतितम्, किन्तु हस्तो मम क्लिन्नोऽवश्यमेव अभवत्। अतः भवान् एव निर्णयं विदधतु।'

अजयसिंहः अवदत्–'महोदय! भ्रमणकाले मम दुग्धं तु भूमौ पतितम्, किन्तु हस्तो नैव क्लिन्नः जातः। यतोहि मया विचारितम् यत् हस्तेन आवृत्य तु पात्रस्थितं दुग्धं दृष्टिगोचरमेव न भविष्यति। अतः हस्तावरणं विनैव मया दुग्धं नीतम्।'

अजेयसिंहाऽवदत्– 'प्रभो! अहं तु आत्मानं सर्वतः निकृष्ट एव मन्ये। यतोहि स्पर्धयामस्यां यदा अहं दुग्धपूर्ण पात्रं नयामि स्म, तदा भ्रमणकाले मम तु हस्तोऽपि क्लिन्नः जातः, पुनश्च दुग्धमपि भूमौ पतितम्।

एवम्प्रकारेण चतुर्णामेव उत्तराणि श्रुत्वा गुरुदेवोवदत्- 'अस्तु। अधुना स्पर्धया: अस्या: वास्तविकं रहस्यम् अहम् उद्घाटयामि, अत: यूयं ध्यानेन तथ्यं शृणुत। अस्यां स्पर्धायां युष्माकं हस्तेषु मया यत्पात्रं प्रदत्तमासीत्, तस्मात् दुग्धकणास्तु बहि: अवश्यमेव निर्गन्तव्या: एव। अत: इदम् असंभवि यत् दुग्धं न पतितम्। एतेन जयसिंहस्य वचनमसत्यमस्तीति स्पष्टतया ज्ञायते। पुनश्च हस्तावरणेनापि दुग्धकणान् बहिर्गन्तुं कोऽपि अवरोद्धुं शक्नोति। यतोहि हस्ताङ्गुलीनां मध्ये तु किञ्चिन्मात्राम् अवकाश:, स्थानञ्च अवश्यमेव अवशिष्यते। अत: विजयोऽपि सत्यवादी नास्ति। अथ च अजय: कथयति यत् स: स्वकीयं हस्तावरणं त्यक्त्वैव दुग्धं नीतवान्। अत: नायं नियमपालक: स्पर्धलु:। एतेन अस्यापि गौरवं न वर्धते। किन्तु अजेयसिंह:, सर्व तथ्यं याथार्थ्येनप्रकटितवान्। अत: अयमेव सत्यशील:, पुरस्कारयोग्यश्च। एवम्प्रकारेण य: सत्यनिष्ठ: स: सर्वत्रैव आद्रियते। तस्मादेव उच्यते 'सत्यमेव जयते' इति ।

एवम्प्रकारेण पुरस्कारयोग्य: क:? इति निर्णीयते। सर्वैरिदमेव ज्ञायते यत् योग्यताया: स्थानम् अत्युन्नतमस्ति, पुनश्च तस्मादपि उन्नतं यदि किमपि वर्तते तदस्ति- सत्याचरणमिति। अत: अस्माभिरय संकल्प: करणीय: यत् वयं कदापि असत्याचरणं नैव करिष्याम:।



**-केन्द्रीय विद्यालय: सै. -३१**
**चण्डीगढ़, हरियाणा**

# सविनय अवज्ञा आन्दोलनम्

-दिनेशः शर्मा

सविनय-अवज्ञा-आन्दोलनम्, ब्रिटिश-साम्राज्यवादं विरुध्य भारतीय-राष्ट्रिय कांग्रेस द्वारा सञ्चालितजनान्दोलने किञ्चित् आसीत्। १९२९ तमवर्षपर्यन्तं भारतेन ब्रिटिशमनोभावाः अवगताः यत् औपनिवेशिक स्वराज्य-प्रदानस्य स्वघोषणायां क्रियात्मकरूपं दास्यति उत नैव इति। भारतीय राष्ट्रिय-कांग्रेसदलेन लाहौराधिवेशने १९२९ तमवर्षे घोषणा कृता यत् तस्य लक्ष्यं भारताय पूर्ण-स्वाधीनताप्राप्तिरासीत्। महात्मगान्धी स्वाभ्यर्थनायां बलाघाताय अप्रिलमासे ६ दिनांके १९३० तमवर्षे सविनयाविज्ञान्दोलस्य प्रारम्भमकरोत्।

यस्य उद्देश्यं किञ्चित् विशिष्टप्रकारकस्य अवैधानिककार्याणि सामूहिकरूपेण ब्रिटिशसर्वकारः नम्रीकृतः। ब्रिटिशसर्वकारः आन्दोलनम् अभिभवितुं दृढप्रयासाः कृताः गान्धिसमेताः नैके कांग्रेसनेतारः समर्थकाश्च काराबद्धाः कृताः।

आन्दोलनकारिणां सर्वकारीयसैनिकानां च मध्ये स्थाने स्थाने घोरसंघर्षः जातः। अनेन आन्दोलनेन ब्रिटिशसर्वकारेण दृष्टं यत् भारतस्य जनता अधुना तस्य सत्तां तिरस्कर्तुं तस्याश्च अवज्ञायै कटिबद्धाः जाताः अपि च तत्र नियन्त्रणं कठिनं वर्तते।

**सविनय-अवज्ञा-आंदोलनस्य कार्यक्रमः-**

महात्मगान्धिना नमकाधिनियमभङ्गः समग्रदेशाय सविनयावज्ञायाः प्रारम्भनिर्देशः आसीत्। अतः स्थाने स्थाने जनाः सर्वकारीयाधिनियमभङ्गः प्रारब्धः। महात्मगान्धी सविनयावज्ञा-आन्दोलने निम्नलितिकार्यक्रमाः सम्मिलिताः -

१. ग्रामे ग्रामे नमकाधिनियमभङ्गः।
२. छात्राः सर्वकारीयविद्यालयान् कर्मचारिणश्च सर्वकारीयकार्यालयान् परित्यक्तवन्तः।
३. जनाः सर्वकाराय करं न दद्युः।
४. स्त्रियः मद्यपान-मादकपदार्थ-वस्त्रापणानाम् अवधानं कुर्युः।

गान्धिना अधिनियमभङ्गेन आन्दोलनानि आरब्धानि। अनुदिनम् एतेषां प्रभावः वर्धितः।

बम्बयि-बंगाल-उत्तरप्रदेश-मध्यप्रान्त-मद्रासेषु अवैधानिकरूपेण लवणनिर्माणम आरब्धम्।

देहल्यां १६०० नार्यः मद्यापणपिधाय रोषप्रदर्शनं कृतवत्यः। ताः सत्याग्रहे भागं नीतवत्यः। नार्यः अपि सर्वकारेण निगृहीताः। आङ्ग्लवस्त्रोद्योगः पीहिताः। घारासनायां २५०० सत्याग्रहिणः लवणभाण्डारे आक्रमणं कृतवन्तः। नैके जनाः तत्र आङ्ग्लसैन्यप्रहारेण व्रणिताः।

जूनमासे १९३०तमे वर्षे इदम् आन्दोलनं सम्पूर्णबलेन प्रवर्धितम्। आरक्षकागुलिकाभिः सत्याग्रहिणः भीताः न जाताः अपितु तेषां संख्या निरन्तरं प्रवृद्धा। अप्रिलमासे १९३०तमवर्षे जवाहरलालनेहरूः तथा चान्ये

महत्त्वपूर्णकांग्रेसनेतारः निगृहीताः। पञ्चमेमासे महात्मगान्धी कारागारे निपातितः। ६०सहस्रम् आन्दोलनकारिणः कारागारायां स्थापिताः। ततः उत्तेजना वर्धिता।

शोलापुरे उत्तेजितसम्मर्देन षड् आरक्षकालयाः नष्टीकृताः। ब्रिटिशसर्वकारेण साइमनकमीशन इति समाख्या तत्र गोलमेजसम्मेलने विचारः कृतः। कांग्रेसस्य अधिकांशकार्यकर्तारः कारागारायाम् आसन्, अतः तेषां प्रतिनिधिः गोलमेजे भागं न स्वीकृतवान्। अनेन प्रकारेण निरन्तरं जनाः आन्दोलनैः स्वातन्त्रतार्थं प्रेरणाः स्वीकृतवन्तः।

आन्दोलनानाम् अनन्तरं भारतं स्वतन्त्रं जातं तत्र सविनयावज्ञान्दोलनस्यापि प्रमुखा भूमिका आसीत्।



**-प्रचार-प्रसार विभागः**
**दि.सं.अ.**

# आचार्यदेवो भव*

**( निबन्धः )**

**- मनोजः डिमरी**

प्राचीनकाले भारतवर्षमिदम् 'आर्यावर्त' इति नाम्ना सुप्रसिद्धम् आसीत् लोके वेदे च, अतएव वयमत्र निवासिनः सर्वेऽपि आर्याः। वैदिकी संस्कृतिः एव आर्याणां सर्वस्वम्। श्रुति-स्मृति-पुराणादिसंवलिता संस्कृतिः वैदिकी संस्कृतिरिति जोघुष्यते। तत्र वयम् एतान् सदुपदेशान् प्राप्नुमः-मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव।

अथवा-

**आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः।**
**माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः** ।। मनुः।।

इत्थं माता-पिता आचार्यश्च त्रय एव एते आचार्यकोटितां यान्ति, अतएव देवतारूपेण पूज्या उपास्या अनुसरणार्हाश्च। यथा इमो बालकस्य जन्मदानमारभ्य भरण-पोषण-शिक्षणादिभिः देवतुल्यतां यातः तथैव आचार्योऽपि। यथोक्तम् - **"वंशो द्विधो जन्मना विद्यया वा"**। इत्थं यथा पितरी तथैव आचार्यश्च। आचार्यः गुरोरपरपर्यायः। शास्त्रेषु गुरोर्महिमा सादरमेभिः शब्दवर्णितः-

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।**
**तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।**

अन्यच्च-

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।**

अहो कियान् महिमा गुरोः यस्योपरि छात्रप्रतिभायाः प्रबोधनस्य महान् भारः सर्वदैव दरीदृश्यते, कथं न स्यादेतादृशो गुरुवर्य्यः प्रणम्यः। मनुना उपाध्यायादपि आचार्यस्य विशिष्टं महत्त्वं प्रतिपादितम्। उपाध्यायः छात्राणां गृहं गत्वा तानुपदिशति किन्तु आचार्यः गुरुकुलस्य कुलपतित्वेन सर्वोच्चासनासीनो भारतीयायां संस्कृतौ चर्चितोऽस्ति। स विधिवदुपनीतान् एव शिष्यानुपदिशति। इत्थम्-'यान्यस्माकं सूचरितानि तानि त्वयोपास्यानि नो इतराणि'। अहो स्पष्टवादिता आचार्यपरम्परायाः। एवं यः शिष्यान् पुत्रवत् साधु शास्ति स नूनं महतोऽपि महीयान्।

स्मरन्तु ब्रह्मर्षेः वसिष्ठस्य रघुकुले सुप्रसिद्धमाचार्यत्वम्। को न जानाति नन्दवंशविनाशकं राजनीतिकोविदम् आचार्यं चाणक्यं। कौरव-पाण्डवादिराजकुलेषु लब्धप्रतिष्ठस्य द्रोणाचार्यस्य नाम्ना कः अपरिचितो भवेद् भूतले। यस्मै श्रद्धाविनतकन्धरेण लब्धधनुर्विद्यापाटवेन एकलव्येन स्वकीयाङ्गुष्ठमपि सहर्षं गुरुदक्षिणायां प्रदत्तम्। सत्यमेतद् गुरोराज्ञा गरीयसी, शिष्याय छात्राय वा न किमप्यदेयं भवति तदर्थम्।

मास्म विस्मरत महर्षिवरस्य वरतन्तोः अकिञ्चनमपि शिष्यं कौत्सं यः क्रोधावेशवतः स्वाचार्यस्य 'कोटीश्चतस्रो दश चाहेरेति' आदेशश्रवण- समकालमेव इक्ष्वाकुकुलकेतनस्य राज्ञो रघोः समीपमाजगाम सहसा। रघुरपि विद्याव्रतस्नातकं नवं भास्वन्तं भास्करमिव कौत्सं पुरतः पश्यन् परमां मुदं ययौ। अपृच्छच्च सादरं तदागमनकारणम्, आकर्ण्य तदीयं सकलवृत्तान्तम् अनुभूय च स्वकीयां निःस्वां दशां, बद्धाञ्जलिः तं प्रार्थयामास स्वकीयायां यज्ञशालायां विश्रमाय। स्वयमपि धनोपार्जनाय कुबेरस्य राजधानीम्प्रति प्रस्थानस्य प्रयत्नं चकार। तद्रात्रौ यः सुवर्णराशिस्तस्य कोषे ववर्ष, राजा रघुः सहर्षं तत्सर्वं कौत्साय ददौ। सोऽपि ततः परिमितं द्रव्यमादाय पुत्रप्राप्ति रूपमाशीर्वादं च रघवे प्रदाय, समुदं चचाल। ततो गुरोराश्रमं प्राप्य सादरं सश्रद्धं सविनयं समस्तां तां धनराशिम् आचार्याय समर्प्य कृतकृत्यो बभूव। वरतन्तुरपि योगबलेन तत् सर्वं विज्ञाय गृहीत्वा च शुभाभीराशीभिः सभाजयामास कौत्सम्।

अस्मिन् विस्तीर्णे भारतवर्षे येषां नामानि स्वर्णाक्षरेषु लेख्यतामर्हन्ति, ते सर्वे निःसन्देहं स्वकीयाचार्याणां कृपयैव विद्यायां, वीरतायां, दानशीलतायां, मन्त्रे, तन्त्रे, शिल्पशास्त्रे, ज्ञाने, विज्ञाने, चिकित्सायां, काव्यरचनाप्रभृतिविभिन्नक्षेत्रेषु च सुप्रसिद्धाः जाताः, नात्र कापि विचिकित्सा। अद्य कालविपर्ययेण सर्वेषु क्षेत्रेषु सर्वासु मान्यतासु च असाधारणं परिवर्तनं चक्षुषोरग्रे नरीनर्ति। न तत्सर्वं विघटनकारकं न चापि एकान्ततः कल्याणकारकमेव वक्तुं शक्यते। अतः प्रस्तुतेऽस्मिन् प्रसङ्गे किमपि प्रकरणप्राप्तमुच्यतेतद्यथा-अस्माकं शास्त्राणि तपःपूतैः रजस्तमोभ्यां निर्मुक्तैस्त्रिकालज्ञैर्महात्मभिर्विर-चितानि सन्ति, अतएव तानि शाश्वतानि कथ्यन्ते तेषु ये सिद्धान्ताः सुस्थिरीकृता विराजन्ते न ते कदापि उल्लङ्घनीया इति। तेषु एकः सिद्धान्तः अयमपि डिण्डिमघोषपुरःसरं प्रस्तोतुं शक्यते, यदि वयं शिक्षायाः समीचीनां समुलब्धिं तथा शिक्षाक्षेत्रे शान्तिं च कामयामहे तर्हि निःसन्देहं पुनरपि अविस्मरणीयः प्राक्तन एष सिद्धान्तः, सर्वैः सर्वकालं च स्वीकर्तव्यः, यद् "आचार्यदेवो भव" इति। अतएवोक्तं निबन्धकृता-

**अमृतस्यन्दिबोधेन महद्भिस्तेजसां चयैः ।**
**आचार्यस्त्वतिशेतेऽत्र दिवाकरनिशाकरो ॥**



**-सम्पादक सहायकः**
**दिल्ली संस्कृत अकादमी**

* प्रस्तावरत्नाकरतः संकलितः निबन्धः

# व्यावहारिक-संस्कृत-शिक्षणम्

## इकारान्त पुलिङ्गशब्दानां त्रिषु वचनेषु पदाभ्यासः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  |  |  |
| ऋषिः अस्ति | ऋषी स्तः | ऋषयः सन्ति |
|  |  |  |
| गिरिः | गिरी | गिरयः |
|  |  |  |
| कपि | कपी | कपयः |
|  |  |  |
| मुनिः | मुनी | मुनयः |

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  |  |  |
| सारथिः | सारथी | सारथ्यः |
|  |  |  |
| अतिथिः | अतिथी | अतिथयः |
|  |  |  |
| नरपतिः | नरपती | नरपतयः |
|  |  |  |
| अलिः | अली: | अलयः |

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  |  |  |
| राशिः | राशी | राशयः |
|  |  |  |
| वनस्पतिः | वनस्पती | वनस्पतयः |
|  |  |  |
| यतिः | यती | यतयः |

# शब्दार्थाः

समयवाचक शब्दाः-

| | | |
|---|---|---|
| अधुना | - | अब |
| मध्याह्न | - | दोपहर का समय |
| वर्षम् | - | वर्ष ( साल ) |
| सप्ताह | - | सप्ताह ( हफ्ता ) |
| मासः | - | महीना |
| होरा | - | घंटा |
| निमेषः | - | मिनट |
| क्षणम् | - | सेकेण्ड |
| अपराह्ण | - | दोपहर के बाद |
| पूर्वाह्ण | - | दोपहर से पहले |
| वासरः | - | दिन |
| घटिका | - | घड़ी |
| सायम् | - | शाम |
| निशा | - | रात |
| पक्षः | - | पखवाड़ा ( १५ दिन का समय ) |
| प्रातः | - | सुबह |
| निशीथ | - | आधीरात |
| शुक्लपक्षः | - | शुक्लपक्ष ( उजले दिन ) जिसमें चन्द्रमा की कलायें बढती हैं। |
| कृष्णपक्षः | - | कृष्णपक्ष ( काले दिन ) जिसमें चन्द्रमा की कलायें घटती हैं। |
| अद्यः | - | आज |
| श्वः | - | कल |
| ह्यः | - | बीता हुआ कल |
| इदानीम् | - | अब |

# व्यावहारिक-संस्कृत-शिक्षणम्

## संख्याप्रयोगः- शब्दरूपम्

| संख्यावाची शब्द | पुंल्लिंग | स्त्रीलिंग | नपुंसकलिंग |
|---|---|---|---|
| एक | एकः बालकः | एका बालिका | एकम् पत्रम् |
| द्वि | द्वौ बालकौ | द्वे बालिके | द्वे पत्रे |
| त्रि | त्रयः बालकाः | तिस्रः बालिकाः | त्रीणि पत्राणि |
| चतुर् | चत्वारः बालकाः | चतस्रः बालिकाः | चत्वारि पत्राणि |

### एक (एकवचनान्त)

| विभक्ति | पुंल्लिंग | स्त्रीलिंग | नपुंसकलिंग |
|---|---|---|---|
| प्रथमा | एकः | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्याः | एकस्मात् |
| षष्ठी | एकस्य | एकस्याः | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |

### द्वि (द्विवचनान्त)

| विभक्ति | पुंल्लिंग | स्त्रीलिंग | नपुंसकलिंग |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| सप्तमी | द्वयोः | द्वयोः | द्वयोः |

## त्रि (बहुवचनान्त)

| विभक्ति | पुंल्लिंग | स्त्रीलिंग | नपुंसकलिंग |
|---|---|---|---|
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

## चतुर् (बहुवचनान्त)

| विभक्ति | पुंल्लिंग | स्त्रीलिंग | नपुंसकलिंग |
|---|---|---|---|
| प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| द्वितीया | चतुरः | चतस्रः | चत्वारि |
| तृतीया | चतुर्भिः | चतसृभिः | चतुर्भिः |
| चतुर्थी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| पञ्चमी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| सप्तमी | चतुर्षु | चतसृषृ | चर्तुषु |

## संस्कृत-संख्या

| | | |
|---|---|---|
| १. एकः | २. द्वौ | ३. त्रयः |
| ४. चत्वारः | ५. पञ्च | ६. षट् |
| ७. सप्त | ८. अष्टौ | ९. नव |
| १०. दश | ११. एकादश | १२. द्वादश |
| १३. त्रयोदश | १४. चतुर्दश | १५. पञ्चदश |
| १६. षोडश | १७. सप्तदश | १८. अष्टादश |
| १९. नवदश / एकोनविंशतिः | २०. विंशतिः | २१. एकविंशतिः |
| २२. द्वाविंशतिः | २३. त्रयोविंशतिः | २४. चतुर्विंशतिः |
| २५. पञ्चविंशतिः | २६. षड्वंशतिः | २७. सप्तविंशतिः |
| २८. अष्टाविंशतिः | २९. नवविंशतिः (एकोनत्रिंशत) | ३०. त्रिंशत् |

| | | |
|---|---|---|
| ३१. एकत्रिंशत् | ३२. द्वात्रिंशत् | ३३. त्रयस्त्रिंशत् |
| ३४. चतुस्त्रिंशत् | ३५. पञ्चत्रिंशत् | ३६. षट्त्रिंशत् |
| ३७. सप्तत्रिंशत् | ३८. अष्टात्रिंशत् | ३९. नवत्रिंशत् |
| | | एकोनचत्वारिंशत् |
| ४०. चत्वारिंशत् | ४१. एकचत्वारिंशत् | ४२. द्विचत्वारिंशत् |
| ४३. त्रिचत्वारिंशत् | ४४. चतुश्चत्वारिंशत् | ४५. पञ्चचत्वारिंशत् |
| ४६. षट्चत्वारिंशत् | ४७. सप्तचत्वारिंशत् | ४८. अष्टत्रिंशत् |
| ४९. नवचत्वारिंशत् | ५०. पञ्चाशत् | ५१. एकपञ्चाशत् |
| ( एकोनपञ्चाशत् ) | | |
| ५२. द्विपञ्चाशत् | ५३. त्रिपञ्चाशत् | ५४. चतुःपञ्चाशत् |
| ५५. पञ्चपञ्चाशत् | ५६. षट्पञ्चाशत् | ५७. सप्तपञ्चाशत् |
| ५८. अष्टपञ्चाशत् | ५९. नवपञ्चाशत् | ६०. षष्टिः |
| ६१. एकषष्टिः | ६२. द्विषष्टिः | ६३. त्रिषष्टिः |
| ६४. चतुष्षष्टिः | ६५. पञ्चषष्टिः | ६६. षट्षष्टिः |
| ६७. सप्तषष्टिः | ६८. अष्टषष्टिः | ६९. नवषष्टिः |
| | | ( एकोनसप्ततिः ) |
| ७०. सप्ततिः | ७१. एकसप्ततिः | ७२. द्विसप्ततिः |
| ७३. त्रिसप्ततिः | ७४. चतुःसप्ततिः | ७५. पञ्चसप्ततिः |
| ७६. षट्सप्ततिः | ७७. सप्तसप्ततिः | ७८. अष्टसप्ततिः |
| ७९.. नवसप्ततिः | ८०. अशीतिः | ८१. एकाशीतिः |
| ( एकोनाशीतिः ) | | |
| ८२. द्व्यशीतिः | ८३. त्र्यशीतिः | ८४. चतुरशीतिः |
| ८५. पञ्चाशीतिः | ८६. षडशीतिः | ८७. सप्ताशीतिः |
| ८८. अष्टाशीतिः | ८९. नवाशीतिः | ९०. नवतिः |
| | एकोननवतिः | |
| ९१. एकनवतिः | ९२. द्विनवतिः | ९३. त्रिणवतिः |
| ९४. चतुर्नवतिः | ९५. पञ्चनवतिः | ९६. षणणवतिः |
| ९७. सप्तनवतिः | ९८. अष्टनवतिः | ९९. नवनवतिः |
| | | ( एकोनशतम् ) |
| १००. शतम् | १०००. सहस्रम् | १००००. लक्षम् |

१००००००- कोटिः १०००००००००- पद्मम्

१०००००००००००० – शङ्खम्

१००००००००००००० – महाशङ्खम्

| | | |
|---|---|---|
| एक बालकः। | एका बालिका। | एकं फलम्। |
| एक लड़का | एक लड़की | एक फल |
| द्वौ बालकौ | द्वे बालिके | द्वे पुस्तके |
| दो बालक | दो बालिकाएँ | दो पुस्तकें |
| त्रयः छात्राः | तिस्रः कन्याः | त्रीणि पुस्तकाणि चात्र सन्ति |
| पञ्चबालकाः | षट्बालिकाः | सप्तपुस्तकानि |
| अष्टजनाः | नववस्त्राणि | दश-फलानि चात्र सन्ति। |

## धातुरूपम्

### पत् ( गिरना ),

#### ( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष-** | पतति | पततः | पतन्ति |
| **मध्यमपरुष-** | पतसि | पतथः | पतथ |
| **उत्तमपुरुष-** | पतामि | पतावः | पतामः |

#### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पततु | पतताम् | पतन्तु |
| **मध्यमपरुष-** | पत | पततम् | पतत |
| **उत्तमपुरुष-** | पतानि | पताव | पताम |

#### ( लङ्  लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अपतत् | अपतताम् | अपतन् |
| | अपतः | अपततम् | अपतत |
| | अपतम् | अपताव | अपताम |

#### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पतेत् | पतेताम् | पतेयुः |
| **मध्यमपरुष-** | पतेः | पतेतम् | पतेत |
| **उत्तमपुरुष-** | पतेयम् | पतेव | पतेम |

#### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पतिष्यति | पतिष्यतः | पतिष्यन्ति |
| **मध्यमपरुष-** | पतिष्यसि | पतिष्यथः | पतिष्यथ |
| **उत्तमपुरुष-** | पतिष्यामि | पतिष्यावः | पतिष्यामः |

## सेव् ( सेवा करना ), आत्मनेपदी,

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | सेवते | सेवेते | सेवन्ते |
| **मध्यमपरुष-** | सेवसे | सेवेथे | सेवध्वे |
| **उत्तमपुरुष-** | सेवे | सेवावहे | सेवामहे |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | सेवताम् | सेवेताम् | सेवन्ताम् |
| **मध्यमपरुष-** | सेवस्व | सेवेथाम् | सेवध्वम् |
| **उत्तमपुरुष-** | सेवै | सेवावहै | सेवामहै |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | असेवत | असेवेताम् | असेवन्त |
| | असेवेथाः | असेवेथाम् | असेवध्वम् |
| | असेवे | असेवावहि | असेवामहि |

### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | सेवेत | सेवेयाताम् | सेवेरन् |
| **मध्यमपरुष-** | सेवेथाः | सेवेयाथाम् | सेवेध्वम् |
| **उत्तमपुरुष-** | सेवेय | सेवेवहि | सेवेमहि |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | सेविष्यिते | सेविष्येते | सेविष्यन्ते |
| **मध्यमपरुष-** | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| **उत्तमपुरुष-** | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## लभ् ( पाना ), आत्मनेपदी,

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | लभते | लभेते | लभन्ते |
| **मध्यमपरुष-** | लभसे | लभेथे | लभध्वे |
| **उत्तमपुरुष-** | लभे | लभावहे | लभामहे |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**- | लभताम् | लभेताम् | लभन्ताम् |
| **मध्यमपरुष**- | लभस्व | लभेथाम् | लभध्वम् |
| **उत्तमपुरुष**- | लभै | लभावहै | लभामहै |

**( लङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**- | अलभत | अलभेताम् | अलभन्त |
| **मध्यमपरुष**- | अलभथाः | अलभेथाम् | अलभध्वम् |
| **उत्तमपुरुष**- | अलभे | अलभावहि | अलभामहि |

**( विधिलिङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**- | लभेत | लभेयाताम् | लभेरन् |
| **मध्यमपरुष**- | लभेथाः | लभेयाथाम् | लभेध्वम् |
| **उत्तमपुरुष**- | लभेय | लभेवहि | लभेमहि |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**- | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| **मध्यमपरुष**- | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| **उत्तमपुरुष**- | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

**-सम्पादक सहायक**
**दिल्ली संस्कृत अकादमी**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347—1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल- मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित